# Shivasankalpa Upanishad 2

# શિવસઙ્કલ્પોપનિષત્ ૨

## Document Information

Text title : shivasankalpopaniShat 2

File name : shivasankalpopaniShat2.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti, NA

Description-comments : aprakAshitA upaniShadaH

Latest update : June 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 19, 2022

*sanskritdocuments.org*

# શિવસઙ્કલ્પોપનિષત્ ૨

ૐ યેનેદં ભૂતં ભુવનં ભવિષ્યત્ પરિગૃહીતમમૃતેન સર્વમ્ ।
યેન યજ્ઞસ્ત્રાયતે સપ્તહોતા તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧॥

યેન કર્માણિ પ્રચરન્તિ ધીરા યતો વાચા મનસા ચારુયન્તિ ।
યત્સમ્મિતમનુ સંયન્તિ પ્રાણિનસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨॥ (યત્સમ્મિતં મનસ્સંચરંતિ)

યેન કર્માણ્યપસો મનીષિણો યજ્ઞે કૃણ્વન્તિ વિદથેષુ ધીરાઃ ।
યદપૂર્વં યક્ષમન્તઃ પ્રજાનાં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩॥

યત્પ્રજ્ઞાનમુત ચેતો ધૃતિશ્ચ યજ્જ્યોતિરન્તરમૃતં પ્રજાસુ ।
યસ્માન્ન ઋતે કિઞ્ચન કર્મ ક્રિયતે તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૪॥

સુષારથિરશ્વાનિવ યન્મનુષ્યાન્નેનીયતેઽભીશુભિર્વાજિન ઇવ । (મનુષ્યાન્મેનિયુતેપશુભિર્વાજિનીવાન્ )
હૃત્પ્રતિષ્ઠં યદજિરં જવિષ્ઠં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૫॥ (હૃત્પ્રવિષ્ટં, યદચરં)

યસ્મિન્નૃચઃસામયજૂꣳષિ યસ્મિન્ પ્રતિષ્ઠિતા રથનાભાવિવારાઃ । (પ્રતિષ્ઠારશનાભાવિભારાઃ)
યસ્મિꣳશ્ચિત્તꣳ સર્વમોતં પ્રજાનાં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૬॥

યદત્ર ષષ્ઠં ત્રિશતꣳસુવીરં યજ્ઞસ્ય ગુહ્યં નવનાવમાય્યમ્ । (સુવીર્યં)
દશ પઞ્ચ ત્રિꣳશતં યત્પરં ચ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૭॥

યજ્જાગ્રતો દૂરમુદૈતિ દૈવં તદુ સુપ્તસ્ય તથૈવૈતિ । (સર્વંતત્સુપ્તસ્ય)
દૂરઙ્ગમં જ્યોતિષાં જ્યોતિરેકં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૮॥

યેન દ્યૌઃ પૃથિવી ચાન્તરિક્ષં ચ યે પર્વતાઃ પ્રદિશો દિશશ્ચ ।
યેનેદં જગદ્વ્યાપ્તં પ્રજાનાં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૯॥

યેનેદં વિશ્વં જગતો બભૂવ યે દેવાપિ મહતો જાતવેદાઃ ।
તદેવાગ્નિસ્તમસો જ્યોતિરેકં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૦॥ (તદેવાગ્નિસ્તદ્વાયુસ્તત્સૂર્યસ્તદુચન્દ્રમાસ્તન્મે)

યે મનો હૃદયં યે ચ દેવા યે દિવ્યા આપો યે સૂર્યરશ્મિઃ ।
તે શ્રોત્રે ચક્ષુષી સઞ્ચરન્તં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૧॥

અચિન્ત્યં ચાપ્રમેયં ચ વ્યક્તાવ્યક્તપરં ચ યત ।
સૂક્ષ્માત્સૂક્ષ્મતરં જ્ઞેયં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૨॥

એકા ચ દશ શતં ચ સહસ્રં ચાયુતં ચ
નિયુતં ચ પ્રયુતં ચાર્બુદં ચ ન્યર્બુદં ચ ।
સમુદ્રશ્ચ મધ્યં ચાન્તશ્ચ પરાર્ધશ્ચ
તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૩॥

યે પઞ્ચ પઞ્ચદશ શતꣳ સહસ્રમયુતં ન્યર્બુદં ચ ।
તેઽગ્નિચિત્યેષ્ટકાસ્તꣳ શરીરં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૪॥ (ચિત્તેષ્ટકાસ્તꣳ)

વેદાહમેતં પુરુષં મહાન્તમાદિત્યવર્ણં તમસઃ પરસ્તાત્ ।
યસ્ય યોનિં પરિપશ્યન્તિ ધીરાસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૫॥

યસ્યેદં ધીરાઃ પુનન્તિ કવયો બ્રહ્માણમેતં ત્વા વૃણુતમિન્દુમ્ । (યસ્યૈતં ધીરાઃ)
સ્થાવરં જઙ્ગમં દ્યૌરાકાશં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૬॥

પરાત્પરતરં ચૈવ યત્પરાચ્ચૈવ યત્પરમ્ । (તત્પરાચ્ચૈવ)
યત્પરાત્પરતો જ્ઞેયં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૭॥

પરાત્પરતરો બ્રહ્મા તત્પરાત્પરતો હરિઃ । (પરાત્પરતરં બ્રહ્મ)
તત્પરાત્પરતોઽધીશસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૮॥ (યત્પરાત્પરતોઽધીશં)

યા વેદાદિષુ ગાયત્રી સર્વવ્યાપી મહેશ્વરી ।
ઋગ્યજુસ્સામાથર્વૈશ્ચ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૯॥

યો વૈ દેવં મહાદેવં પ્રયતઃ પુરુષોત્તમમ્ । (પ્રણવશ્શુચિઃ)
યઃ સર્વે સર્વવેદૈશ્ચ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૦॥

પ્રયતઃ પ્રણવોઙ્કારં પ્રણવં પુરુષોત્તમમ્ ।
ઓઙ્કારં પ્રણવાત્માનં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૧॥

યોઽસૌ સર્વેષુ વેદેષુ પઠ્યતે હ્યજ ઈશ્વરઃ ।
અકાયો નિર્ગુણો હ્યાત્મા તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૨॥

ગોભિર્જુષ્ટં ધનેન હ્યાયુષા ચ બલેન ચ ।
પ્રજયા પશુભિઃ પુષ્કરાક્ષં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૩॥

ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય
માઽમૃતાત્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૪॥

કૈલાસશિખરે રમ્યે શઙ્કરસ્ય શિવાલયે ।
દેવતાસ્તત્ર મોદન્તિ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૫॥

કૈલાસશિખરાવાસા હિમવદ્ગિરિ સંસ્થિતમ્ ।
નીલકણ્ઠં ત્રિનેત્રં ચ તન્મે મનઃ શિવસંકલ્પમસ્તુ ॥ ૨૬॥

વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો વિશ્વતોહસ્ત ઉત વિશ્વતસ્પાત્ ।
સં બાહુભ્યાં નમતિ સમ્પતત્રૈર્દ્યાવાપૃથિવી
જનયન્ દેવ એકસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૭॥

ચતુરો વેદાનધીયીત સર્વશાસ્ત્રમયં વિદુઃ ।
ઇતિહાસપુરાણાનાં તન્મે મનઃ શિવસંકલ્પમસ્તુ ॥ ૨૮॥

મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
માનોઽવધીઃ પિતરં મોત માતરં પ્રિયા માનસ્તનુવો
રુદ્ર રીરિષસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૯॥

માનસ્તોકે તનયે મા ન આયુષિ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ ।
વીરાન્મા નો રુદ્ર ભામિતોઽવધીર્હવિષ્મન્તો
નમસા વિધેમતે તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૦॥

ઋતꣳ સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો
નમસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૧॥

કદ્રુદ્રાય પ્રચેતસે મીઢુષ્ટમાય તવ્યસે ।
વોચેમ શન્તમꣳ હૃદે । સર્વો હ્યેષ રુદ્રસ્તસ્મૈ રુદ્રાય
નમો અસ્તુ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૨॥

બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાદ્વિસીમતઃ સુરુચો વેન આવઃ ।
સ બુધ્નિયા ઉપમા અસ્ય વિષ્ઠાઃ સતશ્ચ યોનિમસતશ્ચ
વિવસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૩॥
યઃ પ્રાણતો નિમિષતો મહિત્વૈક ઇદ્રાજા જગતો બભૂવ ।
ય ઈશે અસ્ય દ્વિપદશ્ચતુષ્પદઃ કસ્મૈ દેવાય
હવિષા વિધેમ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૪॥
ય આત્મદા બલદા યસ્ય વિશ્વે ઉપાસતે પ્રશિષં યસ્ય દેવાઃ ।
યસ્ય છાયાઽમૃતં યસ્ય મૃત્યુઃ કસ્મૈ દેવાય
હવિષા વિધેમ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૫॥
યો રુદ્રો અગ્નૌ યો અપ્સુ ય ઓષધીષુ યો રુદ્રો વિશ્વા ભુવનાઽઽવિવેશ ।
તસ્મૈ રુદ્રાય નમો અસ્તુ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૬॥
ગન્ધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ્ ।
ઈશ્વરીꣳ સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયં
તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૭॥
નમકં ચમકં ચૈવ પુરુષસૂક્તં ચ યદ્વિદુઃ ।
મહાદેવં ચ તત્તુલ્યં તન્મે મનઃ શિવસંકલ્પમસ્તુ ॥ ૩૮॥
ય ઇદꣳ શિવસઙ્કલ્પꣳ સદા ધ્યાયન્તિ બ્રાહ્મણાઃ ।
તે પરં મોક્ષં ગમિષ્યન્તિ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૯॥

ઇતિ શિવસઙ્કલ્પોપનિષત્ સમાપ્તા ।
(શૈવ-ઉપનિષદઃ)

# શિવસઙ્કલ્પોપનિષત્ ૨

## શિવસઙ્કલ્પોપનિષત્

ૐ યેનેદં ભૂતં ભુવનં ભવિષ્યત્ પરિગૃહીતમમૃતેન સર્વમ્ ।
યેન યજ્ઞસ્ત્રાયતે સપ્તહોતા તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧॥

યેન કર્માણિ પ્રચરન્તિ ધીરા યતો વાચા મનસા ચારુયન્તિ ।
યત્સમ્મિતમનુ સંયન્તિ પ્રાણિનસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨॥ (યત્સમ્મિતં મનસ્સઞ્ચરન્તિ)

યેન કર્માણ્યપસો મનીષિણો યજ્ઞે કૃણ્વન્તિ વિદથેષુ ધીરાઃ ।
યદપૂર્વં યક્ષમન્તઃ પ્રજાનાં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩॥

યત્પ્રજ્ઞાનમુત ચેતો ધૃતિશ્ચ યજ્જ્યોતિરન્તરમૃતં પ્રજાસુ ।
યસ્માન્ન ઋતે કિઞ્ચન કર્મ ક્રિયતે તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૪॥

સુષારથિરશ્વાનિવ યન્મનુષ્યાન્નેનીયતેઽભીશુભિર્વાજિન ઇવ । (મનુષ્યાન્મેનિયુતેપશુભિર્વાજિનીવાન્ )
હૃત્પ્રતિષ્ઠં યદજિરં જવિષ્ઠં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૫॥ (હૃત્પ્રવિષ્ટં, યદચરં)

યસ્મિન્નૃચઃસામયજૂꣳષિ યસ્મિન્ પ્રતિષ્ઠિતા રથનાભાવિવારાઃ । (પ્રતિષ્ઠારશનાભાવિભારાઃ)
યસ્મિꣳશ્ચિત્તꣳ સર્વમોતં પ્રજાનાં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૬॥

યદત્ર ષષ્ઠં ત્રિશતꣳ સુવીરં યજ્ઞસ્ય ગુહ્યં નવનાવમાય્યમ્ । (સુવીર્યં)
દશ પઞ્ચ ત્રિꣳશતં યત્પરં ચ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૭॥

યજ્જાગ્રતો દૂરમુદૈતિ દૈવં તદુ સુપ્તસ્ય તથૈવૈતિ । (સર્વંતત્સુપ્તસ્ય)
દૂરઙ્ગમં જ્યોતિષાં જ્યોતિરેકં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૮॥

યેન દ્યૌઃ પૃથિવી ચાન્તરિક્ષં ચ યે પર્વતાઃ પ્રદિશો દિશશ્ચ ।
યેનેદં જગદ્વ્યાપ્તં પ્રજાનાં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૯॥

યેનેદં વિશ્વં જગતો બભૂવ યે દેવાપિ મહતો જાતવેદાઃ ।
તદેવાગ્નિસ્તમસો જ્યોતિરેકં તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૧૦॥ (તદેવાગ્નિસ્તદ્વાયુસ્તત્સૂર્યસ્તદુચન્દ્રમાસ્તન્મે)

યે મનો હૃદયં યે ચ દેવા યે દિવ્યા આપો યે સૂર્યરશ્મિઃ ।

તે શ્રોત્રે ચક્ષુષી સઞ્ચરન્તં તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૧॥

અચિન્ત્યં ચાપ્રમેયં ચ વ્યક્તાવ્યક્તપરં ચ યત ।
સૂક્ષ્માત્સૂક્ષ્મતરં જ્ઞેયં તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૨॥

એકા ચ દશ શતં ચ સહસ્રં ચાયુતં ચ
નિયુતં ચ પ્રયુતં ચાર્બુદં ચ ન્યર્બુદં ચ ।
સમુદ્રશ્ચ મધ્યં ચાન્તશ્ચ પરાર્ધશ્ચ
તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૩॥

યે પઞ્ચ પઞ્ચદશ શતઁ સહસ્રમયુતં ન્યર્બુદં ચ ।
તેઽગ્નિચિત્યેષ્ટકાસ્તઁ શરીરં તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૪॥ (ચિત્તેષ્ટકાસ્તઁ)

વેદાહમેતં પુરુષં મહાન્તમાદિત્યવર્ણં તમસઃ પરસ્તાત્ ।
યસ્ય યોનિં પરિપશ્યન્તિ ધીરાસ્તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૫॥

યસ્યેદં ધીરાઃ પુનન્તિ કવયો બ્રહ્માણમેતં ત્વા વૃણુતમિન્દુમ્ । (યસ્યૈતં ધીરાઃ)
સ્થાવરં જઙ્ગમં દ્યૌરાકાશં તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૬॥

પરાત્પરતરં ચૈવ યત્પરાચ્ચૈવ યત્પરમ્ । (તત્પરાચ્ચૈવ)
યત્પરાત્પરતો જ્ઞેયં તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૭॥

પરાત્પરતરો બ્રહ્મા તત્પરાત્પરતો હરિઃ । (પરાત્પરતરં બ્રહ્મ)
તત્પરાત્પરતોઽધીશસ્તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૮॥ (યત્પરાત્પરતોઽધીશં)

યા વેદાદિષુ ગાયત્રી સર્વવ્યાપી મહેશ્વરી ।
ઋગ્યજુસ્સામાથર્વૈશ્ચ તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૧૯॥

યો વૈ દેવં મહાદેવં પ્રયતઃ પુરુષોત્તમમ્ । (પ્રણવશ્શુચિઃ)
યઃ સર્વે સર્વવેદૈશ્ચ તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૨૦॥

પ્રયતઃ પ્રણવોઙ્કારં પ્રણવં પુરુષોત્તમમ્ ।
ઓઙ્કારં પ્રણવાત્માનં તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૨૧॥

યોઽસૌ સર્વેષુ વેદેષુ પઠ્યતે હ્યજ ઈશ્વરઃ ।
અકાયો નિર્ગુણો હ્યાત્મા તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૨૨॥

ગોભિર્જુષ્ટં ધનેન હ્યાયુષા ચ બલેન ચ ।
પ્રજયા પશુભિઃ પુષ્કરાક્ષં તન્મે મનઃ શિવસઙ્કુલ્પમસ્તુ ॥ ૨૩॥

ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।

ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય
માऽમૃતાત્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૪॥

કૈલાસશિખરે રમ્યે શઙ્કરસ્ય શિવાલયે ।
દેવતાસ્તત્ર મોદન્તિ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૫॥

કૈલાસશિખરાવાસા હિમવદ્ગિરિ સંસ્થિતમ્ ।
નીલકણ્ઠં ત્રિનેત્રં ચ તન્મે મનઃ શિવસંકલ્પમસ્તુ ॥ ૨૬॥

વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો વિશ્વતોહસ્ત ઉત વિશ્વતસ્પાત્ ।
સં બાહુભ્યાં નમતિ સમ્પતત્રૈર્દ્યાવાપૃથિવી
જનયન્ દેવ એકસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૭॥

ચતુરો વેદાનધીયીત સર્વશાસ્ત્રમયં વિદુઃ ।
ઇતિહાસપુરાણાનાં તન્મે મનઃ શિવસંકલ્પમસ્તુ ॥ ૨૮॥

મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
માનોऽવધીઃ પિતરં મોત માતરં પ્રિયા માનસ્તનુવો
રુદ્ર રીરિષસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૨૯॥

માનસ્તોકે તનયે મા ન આયુષિ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ ।
વીરાન્મા નો રુદ્ર ભામિતોऽવધીર્હવિષ્મન્તો
નમસા વિધેમતે તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૦॥

ઋતꣳ સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો
નમસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૧॥

કદ્રુદ્રાય પ્રચેતસે મીઢુષ્ટમાય તવ્યસે ।
વોચેમ શન્તમꣳ હૃદે । સર્વો હ્યેષ રુદ્રસ્તસ્મૈ રુદ્રાય
નમો અસ્તુ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૨॥

બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાદ્વિસીમતઃ સુરુચો વેન આવઃ ।
સ બુધ્નિયા ઉપમા અસ્ય વિષ્ઠાઃ સતશ્ચ યોનિમસતશ્ચ
વિવસ્તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૩॥

યઃ પ્રાણતો નિમિષતો મહિત્વૈક ઇદ્રાજા જગતો બભૂવ ।
ય ઈશે અસ્ય દ્વિપદશ્ચતુષ્પદઃ કસ્મૈ દેવાય
હવિષા વિધેમ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૪॥

ય આત્મદા બલદા યસ્ય વિશ્વે ઉપાસતે પ્રશિષં યસ્ય દેવાઃ ।
યસ્ય છાયાઽમૃતં યસ્ય મૃત્યુઃ કસ્મૈ દેવાય
હવિષા વિધેમ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૫॥

યો રુદ્રો અગ્નૌ યો અપ્સુ ય ઓષધીષુ યો રુદ્રો વિશ્વા ભુવનાઽઽવિવેશ ।
તસ્મૈ રુદ્રાય નમો અસ્તુ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૬॥

ગન્ધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ્ ।
ઈશ્વરીꣳ સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયં
તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૭॥

નમકં ચમકં ચૈવ પુરુષસૂ॒ક્તં ચ યદ્વિદુઃ ।
મહાદેવં ચ તત્તુલ્યં તન્મે મનઃ શિવસંકલ્પમસ્તુ ॥ ૩૮॥

ય ઇદꣳ શિવસઙ્કલ્પꣳ સદા ધ્યાયન્તિ બ્રાહ્મણાઃ ।
તે પરં મોક્ષં ગમિષ્યન્તિ તન્મે મનઃ શિવસઙ્કલ્પમસ્તુ ॥ ૩૯॥

ઇતિ શિવસઙ્કલ્પોપનિષત્ સમાપ્તા ।
(શૈવ-ઉપનિષદઃ)

Verses 26 and 38 are not found in the referenced print.
Proofread by Kasturi navya sahiti, NA

*Shivasankalpa Upanishad 2*

pdf was typeset on June 19, 2022

Please send corrections to *sanskrit@cheerful.com*